॥ श्री गणेशो विजयते ॥

शुकरंभा संवादः

मुमुक्षुज्ञानार्थम्-

संस्कृतगुर्जरभाषाभ्याम् संवलितः

सनातनधर्मोपदेशकेन व्याख्यानदात्रा कीर्तनभूषण हरिदासविशारदेतिपदद्वयम्प्राप्तेन **नागेश्वरात्मजेन** **शङ्करशर्मणा** संस्कृतः संशोधितश्च ।

तस्येयं प्रथमावृत्तिः

सूर्यपुर पत्तने

मुल्यं १ आणकः

છપાવી પ્રસિદ્ધ કરનાર—
ગૃહસ્થ મંડળ પાદરાના આશ્રયથી.
રેવાશંકર નાગેશ્વર હરિદાસ
વેજલપોર-ભરૂચ,

છાપનાર
મુળચંદ કસનદાસ કાપડિયા
"જૈન વિજય" પ્રિન્ટિંગ પ્રેસ
[illegible] પોળ લક્ષ્મીનારાયણની વાડી—સુરત,

ॐ

પ્રસ્તાવના.

સદ્દગુણાલંકૃત મહાશયો ? સર્વ શક્તિમાન્ ઇશ્વરનું ધ્યાન પુજન કરી જ્ઞાન સંપન્ન થઇ સર્વમાં ઇશ્વરને જોઇ સદાનંદમાં મગ્ન રહેવું એજ આ મનુષ્યાવતારનું પરમ સાફલ્ય છે. પરંતુ અનેક જન્મના અભ્યાસને લઇને મનુષ્યચિત્ત સન્માર્ગમાં જવાના સમયે કામદેવ રૂપી જોરાવર સિંહના પંજામાં સપડાઇ જાય છે. જ્યાં તન, મન, અને ધન સાથે માનવ જીવનની પુરેપુરી ખ્વારી કરે છે.

કામ વને ભસ્મ કર્યો, શિવે નાખ્યો બાળી;
તે છતાં અરે રાખ વારી નાખે જનોને પ્રજાળી.
મદન બાણુ કામીઓને કરે ઘાત કારી.

એ નિયમ મુજબ એ કામદેવના પંજામાંથી મુક્ત થવાનું કામ ઘણું કઠીણુ છે. અને એ કામદેવજ મનુષ્યના ઉન્નતિના માર્ગમાં આડે આવે છે.

જપીતપી સન્યાસી એના કર વિષે સપડાય છે;
જ્ઞાની અને ધ્યાની ભલે એ રંગમાં રગદાય છે;
ધન ધામ કીર્તિ ત્યાં [illegible] કુમાર્ગે [illegible] વસડાય છે;
જન્મ મરણ[illegible] રૂપે તે પછી અફળાય છે;

એને એટલાજ માટે જ્યા સુધી મદન—કામદેવ અને લક્ષ્મી ઉલટું મદ—ન—મદ નહીં અર્થાત્ કામ રહિતપણું એટલે વૈરાગ્ય એ બેનુ પૂર્ણ સ્વરૂપ સમજાય નહીં એ બેમાં શ્રેષ્ઠતા કોની છે, તે સમજાય નહીં. અને બેમા હારજીત કોના છે, તેનો પુરેપુરો ખ્યાલ આવે નહીં ત્યાંસુધી. માનવી પુરેપુરી રીતે એ કામની જાળમાંથી બચી શકે નહીં.

આ પ્રાચીન સાહિત્યમાંનો એક નાનકડો ભાગ શુકરંભા સંવાદ એ કાર્ય માટે બસ છે, એમ સમજી ભૃગુપુર નિવાસી મહાત્મા શ્રી રેવાશંકર નાગેશ્વર "હરિદાસ, વિશારદ" અને "કીર્તનભૂષણ" એઓનાં વ્યાખ્યાનોમાં વડોદરામાં વારંવાર સાંભળવા પછી એઓશ્રીને પ્રાર્થના કરી આ નાનકડું પુસ્તક તૈયાર કરાવેલું હતું, જે સજ્જનોના કર કમલમાં મુકવામાં આવે છે. અને એને જનસમાજ સમક્ષ જલ્દી મુકવાનું કાર્ય, પાદરાના ગૃહસ્થોએ કર્યું છે જે માટે તેમનો સંપૂર્ણ આભાર માનવાની જરૂર છે. અને મહારાજશ્રી તો આવાં અનેક કાર્યો કરીજ રહ્યા છે એ તેમનાં વ્યાખ્યાનો સાંભળનારાઓને સુવિદિત છે. તેથી તેઓશ્રીનો જેટલો આભાર માનીએ તેટલો ઓછો છે.

આ નાનકડા પુસ્તકમાં રંભા વર્ણિત શ્રૃંગાર, અને શુકદેવ વર્ણિત ઇશ્વર સ્મરણ છે. જોકે બંન્ને માર્ગ પરસ્પર વિરૂદ્ધ ધર્મવાળા છે. છતાં પરીણામ તપાસતાં શુકદેવને જય પ્રાપ્તિ થઇ છે. તેથી જનતસમાજ શુકદેવના માર્ગને ગ્રહણ કરી રંભાનો માર્ગ ત્યાગ કરશે

વિદ્યાર્થીઓને [illegible] થયો ગણાશે.

પડે તે માટે પ્રત્યેક શ્લોકની નીચે [illegible]ત જાણનારાઓને ઉપયોગી થઇ આવી છે અને કેવળ ગુર્જર ભાષા જાણનારાઓ માટે ગુજરાતી ટીકા સંસ્કૃત [illegible] ટીકા આપવા પણ સાથે જોડવામાં આવી છે.

ઇત્યલમ્.

શા. છગનલાલ, સાંકળચંદ પરિખ.

વડોદરા–મામાનીપોળ.

शुक-रंभा संवादः

रंभोवाच ॥

मार्गे मार्गे नूतनं चूतखंडं,
खंडे खंडे कोकिलानां विरावः ।
रावे रावे मानिनी मानभङ्गो,
भङ्गे भङ्गे मन्मथः पञ्चबाणः ॥ १ ॥

हे शुक ! मार्गे मार्गे नूतनं नवीनं चूतानाम् आम्रवृक्षाणां खण्डम् अस्ति इतिशेषः तस्मिन्खण्डे कोकिलानां परभृताम् विरावः शब्दः भवति तस्मिन् विरावे जाते सति मानिन्याः मानवत्याः मानः गर्वः तस्य भङ्गो नाशः भवति । मानिन्या अपिमानभङ्गः किं पुनः साधारणस्त्रीणाम् । तस्मिन्भंगे पञ्च बाणाः यस्य सः मन्मथः प्रभवति ॥

રસ્તે રસ્તે નવી આંબાવાડી છે. દરેક આંબાવાડીમાં કોયલોનો શબ્દ થાય છે. શબ્દે શબ્દે ટેકીલી સ્ત્રીઓનો ટેક તૂટી જાય છે અને જેમ જેમ ટેક તુટતો જાય છે તેમ તેમ મદન કામદેવ પાંચ બાણથી મારનાર થાય છે.

शुक उवाच ॥

मार्गे मार्गे जायते साधु संगः
संगे संगे श्रूयते कृष्णकीर्तिः ।

कीर्तौ कीर्तौ न स्तदाकारवृत्ति,
वृत्तौ वृत्तौ सच्चिदानन्दभासः ॥२॥

रंभे ? मार्गे मार्गे साधूनां सज्जनानां संगः परिचयः संगतिश्च जायते। तस्मिन् संगे कृष्णस्य प्रभोः कीर्तिर्यशः श्रूयते। तस्यां कीर्त्तौ नः अस्माकं तस्या कारस्याकार इव वृत्ति र्भवति। तस्यां तदाकार वृत्तौ सच्चिदानन्दस्येश्वरस्य भासः प्रकाशः भवति अनुभूयते इत्यर्थः।

રસ્તે રસ્તે સત્પુરૂષોનો સમાગમ થાય છે. તે સમાગમમાં કૃષ્ણ પરમાત્માની કીર્તિ સાંભળવામાં આવે છે જેમ જેમ કીર્તિઓ સંભળાય છે તેમ તેમ અમારી ચિત્તવૃત્તિઓ તદાકાર બને છે. અને ચિત્ત વૃત્તિ તદાકાર થતાં સચ્ચિદાનંદ સ્વરૂપનો સાક્ષાત્કાર થાય છે.

शुक उवाच॥

तीर्थे तीर्थे निर्मलं ब्रह्मवृन्दं।
वृंदे वृंदे तत्वचिंतानुवादः।
वादे वादे जायते तत्व बोधो,
बोधे बोधे भासते चन्द्र चूडः॥ ३॥

तीर्थे पवित्र क्षेत्रे निर्मलं पवित्रं ब्रह्मविदां ब्राह्मणानां वृन्दं समूहः वर्त्तते. तस्मिन् वृन्दे तत्वस्य तत्व ज्ञानस्य चिन्तायाः विचार स्यानुवादो विवादो भवति. विवादे जाते तस्मिन् तत्वस्य तत्वज्ञा-

नस्य बोध ज्ञानं जायते भवति, जायमाने तस्मिन् बोधे चंद्र ऋतु, चूडे शिरसि यस्य सः ईश्वरःशङ्करः दृश्यते इत्यर्थः—

દરેક તીર્થમાં નિર્મલઅન્તઃ કરણવાળું બ્રાહ્મણોનું ટોળું જણાય છે. તે બ્રહ્મજાણનાર બ્રાહ્મણોના ટોળામાં તત્વના વિચારનો સંવાદ થાય છે. જેમ જેમ વાદ થાય છે તેમ તેમ તત્વજ્ઞાનનો સબ્દોધ થાય છે. કે જે બોધ થવાથી પરિણામે પરમાત્મા શંકરનો સાક્ષાત્કાર થાય છે.

रंभोवाच ॥

गेहे गेहे जङ्गमा हेमवल्ली,
वल्यां वल्यां पार्वणं चन्द्रबिम्बम् ।
बिंबे बिंबे दृश्यते मीनयुग्मं,
युग्मे युग्मे पञ्चबाणः प्रचारः ॥ ४ ॥

गेहे गेहे जङ्गमा गच्छन्ती हेम्नः सुवर्णस्य वल्ली लता दृश्यते, तस्यां लतायां शरच्चन्द्रस्य बिंबं दृश्यते, तस्मिन्न मीनयोर्युग्मं द्वंद्व मालोक्यते तस्मिन् युग्मे द्वन्द्वे पञ्चबाणः यस्य ... य मदनस्य प्रचारः भवति ।

ઘેર ઘેર ફરતિ સોનાની વેલ (સ્ત્રી) જોવામાં આવેછે તે સોનાની વેલમાં શરદ ઋતુની પૂર્ણિમાનાચંદ્રનું બિંબ (મુખ) જણાય છે. દરેક જણાતા ચંદ્રમાં માછલાંનું જોડું (આંખો) જોવામાં આવેછે અને તેજ માછલાના જોડામાં (આંખોમાં) કામદેવ જોવામાં આવે છે.

शुक उवाच ॥

स्थाने स्थाने दृश्यते रत्नवेदी
वेद्यां वेद्यां सिद्धगन्धर्वगोष्ठी ।
गोष्ठ्यां गोष्ठ्यां किन्नरद्वन्द्वगीतं
गीते गीते गीयते रामचन्द्रः ॥ ५ ॥

स्थाने स्थाने रत्नानां खचित रत्नानां वेदी दृश्यते आलोक्यते । वेद्यां वेद्यां सिद्धानां गन्धर्वाणां च गोष्ठी वार्तालापः श्रूयते तस्यां गोष्ठौ वार्तायां किन्नरविशेषाणां गीतं गानं श्रूयते । गीते रामचन्द्र ईश्वरः गीयते किन्नराः रामसंबन्धिगानं कुर्वन्ति अतएव ईश्वरः स्मर्तव्यः ।

ઠેકાણે ઠેકાણે રત્નમાણેકની વેદીઓ (ઓટલીઓ) જોવામાં આવે છે તે દરેક વેદીમાં સિદ્ધ ગંધર્વ અને કિન્નરોની સારી સારી વાતો થાય છે અને તે વાતોમાં કિન્નરોનું ગાન થાય છે. અને તે દરેકમાં શ્રી રામચંદ્રજીનાં ચરિત્ર ગવાય છે. માટે સાક્ષાત્ ઇશ્વરનું જ સ્મરણ કરવું.

रंभोवाच ॥

पीनस्तनी चन्दनचर्चितांगी
विलोलनेत्रा तरुणी सुशीला ।
नालिंगिता प्रेमभरेण येन
वृथागतं तस्य नरस्य जीवितम् ॥ ६ ॥

पीनौ पुष्टौ स्तनौ यस्याः। चन्दनेन गन्धेन चर्चितं व्याप्तमंगं शरीरं यस्या। विलोलेनेत्रे यस्याः सुशीला सुस्वभावा तरुणी युवती येन पुंसा पुरुषेण प्रेमस्य भरः तेन न आलिंगिता न मर्दिता चेत् तस्यपुंसः जीवितं वृथा निरर्थकं गतम्।

પુષ્ટ સ્તનવાળી ચંદનથી લેપ કરવામાં આવેલા શરીરવાળી ચંચળ નેત્રવાળી સારા સ્વભાવની (યુવતી) યુવાવસ્થાની સ્ત્રી જે પુરૂષથી આલિંગન કરવામાં આવી નથી તે પુરૂનું જીવન વૃથા ગયું.

शुक उवाच ॥

अचिन्त्यरूपो भगवान्निरञ्जनो,
विश्वंभरो ज्ञानमय श्चिदात्मा।
विशोधितो येन हृदि क्षणंनो,
वृथागतं तस्य नरस्य जीवितम् ॥ ७ ॥

अचिन्त्यं अविचार्यं रूपं स्वरूपं यस्य। निरंजनः। विश्वं भरतीति तथाभूतः। ज्ञानप्रचूरः ज्ञानमयः चिदात्मा भगवान् ईश्वरः। येन पुंसा हृदि स्वहृदये क्षणं न विशोधितोऽन्वेषितः तस्य नरस्य पुंसः जीवितम् जीवनं वृथा निरर्थकं गतम्॥

જેણે, જેમનું સ્વરૂપ પણ વિચારી શકાતું નથી. એવા નિરંજન જ્ઞાન સ્વરૂપ સચ્ચિદાનંદ સ્વરૂપ વિશ્વનું પોષણ કરનારા ભગવાનનું પોતાના હૃદયમાં ધ્યાન ધર્યું નથી, તેનું જીવન વૃથા ગયું.

रंभोवाच॥

कामातुरा पूर्ण शशाङ्कवक्त्रा,
बिंबाधरा कोमलनालगौरी।
नांदोलिता स्वे हृदये भुजाभ्याम्,
वृथागतं तस्य नरस्य जीवितम् ॥ ८ ॥

कामेन मदनेन आतुरा पीडिता। पूर्णश्चासौ शशाङ्कश्चंद्रः इव वक्त्रं मुखं यस्याः। बिंब इव अधर : अधरोष्ठः यस्याः सातथाभूता। कोमलं मृदुनालं बिसतंतु तद्वत् गौरी गौरवर्णा युवती स्त्री येन पुंसा स्वभुजाभ्याम् आत्महस्ताभ्यां नान्दोलिता नालिङ्गिता तस्य जीवितं वृथा गतम् ॥

જેણે, કામથી પીડાતી, કામાતુર પૂર્ણિમાના ચંદ્ર સરખા મુખવાળી, બિંબના સરખા અધરોષ્ઠવાળી કોમળ બીસતંતુના સરખી ગૌરવર્ણવાળી યુવતી સ્ત્રી. પોતાના હાથથી આલિંગી નથી તેનું જીવન વૃથા ગયું.

शुक उवाच॥

चतुर्भुज श्चक्रधरो गदायुधः
पीताम्बरः कौस्तुभमालया लसन्।
ध्याने धृतो येन न बोधकाले
वृथागतं तस्य नरस्य जीवितम् ॥ ९ ॥

चत्वारः भुजाः हस्ता यस्य तथा भूतश्चक्रधरश्चक्रधारकः । गदा कौमोदकी आयुधं यस्य । पीतम् पीतवर्णं अंबरं वस्त्रं यस्य । कौस्तुभ मालया लसन् शोभायुक्तः यः हरिः येन पुंसा ध्याने ध्यानमार्गे बोधसमये न धृतः तस्य पुंसः जीवितं वृथा गतम् ।

જેણે ચાર હસ્તવાળા સુદર્શન ચક્રને ધારણ કરનારા પીતાંબરને ધારણ કરનારા અને કૌસ્તુભ માળાથી શોભતા પરમાત્મા હરિ ધ્યાન માર્ગમાં ધારણ નથી કર્યા તેનું જીવન વ્યર્થ ગયું.

रंभोवाच ॥

विचित्रवेषा नवयौवनाढया ।
लवंगकर्पूरसुवासिदेहा ॥
नालिंगिता येन दृढं भुजाभ्याम् ।
वृथागतं तस्य नरस्य जीवितम् ॥ १० ॥

विचित्रो चित्रविचित्रो वेषो नेपथ्यो यस्याः । नवेन नूतनेन यौवनेन युवत्याः भावस्तेन आढया संपूर्णा । लवंगैश्च कर्पूरैश्च सुवासी देहश्शरीरं यस्या एतादृशी पूर्वोक्ता स्त्री येन पुरुषेण न आलिंगिता मर्दिता तस्य नरस्य जीवितम् जीवनं वृथा निरर्थकं गतम् ।

ચિત્ર વિચિત્ર વેષવાળી, નવા ખીલતા યૌવનથી, સંપૂર્ણ શરીરવાળી. લવિંગ અને કપૂરથી સુગંધીદાર શરીરવાળી, યુવતી સ્ત્રીનું જે જે પુરૂષે પોતાના હાથથી સારી રીતે આલિંગન કર્યું નથી તેનું જીવન વૃથા ગયું.

शुक उवाच ॥

नारायणः पङ्कजलोचनः प्रभुः
केयूरवान् कुण्डलमंडिताननः ।
भक्त्या स्तुतो येन समाधिना नो,
वृथागतं तस्य नरस्य जीवितम् ॥ ११ ॥

नारा अयनं यस्य जलशयनः । पङ्कात् कर्दमात् जातं कमल-मिव लोचनं यस्य कमलनेत्रः । केयुरवान् कुण्डलेन मंडितं शोभितं आननं यस्य सः प्रभुः ईश्वरः येन पुरुषेण समाधिना भक्त्या न स्तुतो न प्रार्थित स्तस्य नरस्य जीवनम् वृथा गतं ।

કમલ સરખા નેત્રવાળા કેયૂરને ધારણ કરનારા કુંડલથી શોભીતા મુખવાળા નારાયણ પ્રભુને સમાધિથી અને ભક્તિથી સંભાળ્યા નથી તેનું જીવન વૃથા ગયું.

रंभोवाच ॥

प्रियंवदा चम्पकहेमवर्णा ।
हारावलीमण्डितनाभिदेशा ॥
संभोगशीला रमिता न येन ।
वृथा गतं तस्य नरस्य यौवनम् ॥ १२ ॥

प्रियं मनोहरं वदति इति प्रियंवदा । चम्पकश्च हेमच तयोः वर्ण इव वर्णोयस्याः चम्पक हेम सदृशोत्यर्थः हारस्यावलिः पंक्तिः

तया मंडितश्शोभितः नाभेः देशः प्रस्थानम् यस्याः । संभोगः एव शीलं स्वभावः यस्याः । सुरतस्वभावेत्यर्थः । एतादृशी स्त्री येन पुरुषेण नरमितानालिंगिता तस्य पुरुषस्य यौवनं वृथा गतम् ।

પ્રિય બોલનાર ચંપા તથા સોના સરખી કાન્તિવાળી હારથી શોભિતા નાભિસ્થાનવાળી સંભોગમાં પ્રીતિવાળી સ્ત્રીને જેણે આલિંગન કર્યું નથી તેનું જીવન વૃથા ગયું.

शुक उवाच ॥

श्रीवत्सलक्ष्म्याङ्कितहृत्प्रदेश ।
स्तार्क्ष्यध्वजः शार्ङ्गधरः परात्मा ॥
न सेवितो येन नृजन्मनापि ।
वृथा गतं तस्य नरस्य जीवितम् ॥ १३ ॥

श्रीवत्सलक्ष्म्या अङ्कितश्चिन्हितः हृदयस्य प्रदेशो यस्य । तार्क्ष्यःगरुडो । ध्वजे यस्य । शार्ङ्ग नाम धनुस्तद्धरतीति तथाभूतः । परात्मा ईश्वरः । येन नृजन्म यस्य नृजन्मा तेन पुंसा नसेवित स्तस्य पुरुषस्य जीवितम् वृथा गतम् ।

જે પુરૂષે, શ્રીવત્સ લક્ષ્મીથી શોભિત હૃદય પ્રદેશવાળા, જેની ધ્વજામાં ગરૂડ છે એવા, શાર્ઙ ધનુષને ધારણ કરનારા પ્રભુનું ધ્યાન ધર્યું નથી તેનું જીવન નિરર્થક ગયું.

रंभोवाच ॥

चलत्कटी नूपुरमञ्जुघोषा ।
नासाग्रमुक्ता नयनाभिरामा ॥
न सेविता येन भुजंगवेणी ।
वृथा गतं तस्य नरस्य जीवितम् ॥ १४ ॥

चलन्ती कटी यस्याः । नूपुरेण मञ्जु मनोहरो घोषो यस्याः । नासाग्रे मुक्तानि यस्याः । नयनेन कमलनयनेन अभिरामा । भुजंग इव वेणी यस्याः । एतादृशी स्त्री येन पुंसा नसेविता नालिंगिता तस्य नरस्य जीवितम् वृथा गतम् ।

વિલાસથી હાલતી કટી પ્રદેશવાળી, ઝાંઝરથી સુંદર શબ્દવાળી, નાસિકાના અગ્રભાગમાં જેને મોતિઓ છે એવી, કમળ સરખા નેત્રથી સુંદર જણાતી ભુજંગ સર્પના જેવા લાંબા કેશકલાપવાળી સ્ત્રી જે પુરૂષે સેવી નથી તેનું જીવન વ્યર્થ ગયું.

शुक उवाच ॥

विश्वंभरो ज्ञानमयः परेशो ।
जगन्मयोऽनन्तगुणप्रकाशः ॥
नाराधितो नापि धृतो न योगे ।
वृथा गतं तस्य नरस्य, जीवितम् ॥ १५ ॥

विश्वं बिभर्ति इति । ज्ञानप्रचुरो ज्ञानमयः। परेशः। जगन्मयः

अनन्तान् गुणान् प्रकाशयति इति तथोक्तः ईश्वरः । येन नाराधितः अपि न योगे भृत स्तस्य जीवितं जीवनं वृथा गतम् ।

જેણે વિશ્વનું પોષણ કરનાર, જ્ઞાનમય પોતાના અનંત ગુણોનો પ્રકાશ કરનારા ઇશ્વરનું યોગમાં ધ્યાન ધર્યું નથી અથવા તો સ્તુતિ કરી નથી તેનું જીવન નકામું ગયું.

रंभोवाच ॥

ताम्बूलरागैः कुसुमप्रकर्षैः
सुगन्धतैलेन च वासितायाः ।
नो मर्दितौ येन कुचौ निशायां ।
वृथा गतं तस्य नरस्य जीवितम् ।

ताम्बूलस्य ये रागास्तैः । कुसुमानां प्रसूनानां प्रकर्षा स्तैश्च सुगन्धि तैलं तेन वासितायाः स्त्रियाः कुचौ स्तनौ निशायां मध्यरात्रौ येन पुंसा पुरुषेण नमर्दितौ तस्य नरस्य जीवितम् वृथा गतम् ।

જેણે તાંબુલના રાગ, સુગંધદાર પુષ્પના હાર અને સુગંધિદાર તેલ અત્તરથી સુગંધિદાર બનેલી સ્ત્રીનું રાત્રીમાં કુચમર્દન કર્યું નથી તેનું જીવન વ્યર્થ ગયું.

शुक उवाच ॥

ब्रह्मादिदेवोऽखिलविश्वदेवो ।
मोक्षप्रदोऽतीतगुणः प्रशान्तः ॥

धृतो न योगेन हृदि स्वकीये ।
वृथा गतं तस्य नरस्य जीवितम् ॥ १७ ॥

ब्रह्मणः आदि देवः । अखिलस्य समग्रस्य विश्वस्य जगतः देवः मोक्षं प्रददाति इति । अतीताः गुणाः यस्य अनन्तगुण इत्यर्थः प्रशान्त ईश्वरः येन पुरुषेण स्वकीये हृदि हृदये योगेन योगमार्गेण न धृतो न धारितः तस्य जीवितं वृथा गतम् ।

જેણે બ્રહ્મદેવના પણ આદિ દેવ આખા જગતમાં વ્યાપીને રહેલા મોક્ષને આપનાર ત્રણ ગુણોથી દૂર રહેલા શાન્ત સ્વરૂપ પરમેશ્વર પોતાના હૃદયમાં યોગમાર્ગ દ્વારા ધારણ કર્યા નથી. તેનું જીવન વ્યર્થ ગયું.

रंभोवाच ॥

कस्तूरिकाकुङ्कुमचन्दनैश्च ।
सुचर्चिता याऽगुरु धूपिताम्बरा ॥
उरः स्थले नो लुठिता निशायां ।
वृथा गतं तस्य नरस्य जीवितम् ॥ १८ ॥

कस्तूरिका च कुंकुमस्य केशरस्य चन्दनानि तैस्सु चर्चिता सुलेपिता । अगुरुः द्रव्यविशेषः तेन धूपितं वासित मम्बरं यस्याः । एतादृशी । या स्त्री येन पुरुषेण निशायां मध्यरात्रौ उरःस्थले न लुठिता नालिंगिता तस्य जीवितं वृथा गतम् ।

જેણે કસ્તુરીવાળા કેશરના ચંદનથી ચર્ચાયલી અગરુના ધૂપથી સુગંધિવાળા વસ્ત્રોને પહેનારી જે તરૂણી રાત્રીમાં પોતાના વૃક્ષસ્થલ ઉપર આલોટાવી નથી તેનું જીવન વ્યર્થ ગયું.

शुक उवाच ॥

आनंदरूपो निजबोधरूपो ।
दिव्यस्वरूपो बहु नामरूपः ॥
तपः समाधौ कलितोनयेन
वृथा गतं तस्य नरस्य जीवितम् ॥ १९ ॥

आनंदस्वरूपः । ज्ञानस्वरूपः । दिव्यं शोभायुक्तं स्वरूपं यस्य । बहुनाम रूपः ईश्वरः । येन पुंसा तपस स्समाधि स्तस्मिन् नधृतस्तस्य नरस्य जीवितं वृथा गतम् ।

જેણે આનંદસ્વરૂપ, જ્ઞાનમય, દીવ્યસ્વરૂપવાળા, ઘણા નામ તથા રૂપવાળા ઇશ્વર ધ્યાનમાં આણ્યા નથી તેનું જીવન વૃથા ગયું.

रंभोवाच ॥

कठोरपीनस्तनभारनम्रा ।
सुमध्यमाचञ्चलखञ्जनाक्षी ।
हेमन्तकाले रमिता न येन ।
वृथा गतं तस्य नरस्य जीवितम् ॥ २० ॥

कठोरयोः पूर्णयोः पीनयोः पुष्टयोः कुचयोः भारेण नम्रा नमिता । सुष्ठुमध्यमो मध्यमाग यस्याः । चञ्चलयोः खञ्जनयोः इव अक्षिणी यस्याः । एतादृशी पूर्वोक्ता युवती स्त्री येन पुंसा हेमन्तकाले नरमिता नान्दोलिता तस्य नरस्य जीवितं वृथा गतम्

જેણે કઠણ અને પુષ્ટ સ્તનના ભારથી નમી ગયેલી, સારા કટી ભાગવાળી, ચંચલ ખંજનના જેવા નેત્રવાળી, સ્ત્રીનું આલિંગન કર્યું નથી તેનું જીવન વૃથા ગયું.

शुक उवाच ॥

तपोमयो ज्ञानमयो विजन्मा ।
विद्यामयो योगमयः परात्मा ॥
चित्ते धृतोनो तपसि स्थितेन ।
वृथा गतं तस्य नरस्य जीवितम् ॥ २१ ॥

तपः प्रचूरस्तपोमयः । ज्ञानमयः । विगतं जन्म अवतारः यस्य जन्मरहित इत्यर्थः । विद्यावान् योगप्रचूरः । परश्चासौ आत्मा चेति एतादृशः । ईश्वरः तपसि स्थितेन स्थितिं कुर्वताजनेन चित्ते न धृतस्तस्य जन्म वृथा गतम् ।

તપશ્ચર્યામાં રહેલો જેણે, તપસ્વરૂપ, જ્ઞાનસ્વરૂપ, વિદ્યાસ્વરૂપ, યોગમય, પરમાત્મા, પોતાના હૃદયમાં ધારણ કર્યા નથી, તે માણસનું જીવન વૃથા ગયું.

रंभोवाच ॥

सुलक्षणा मानवती गुणाढया ।
प्रसन्नवक्त्रा मृदुभाषिणीया ॥
नो चुंबिता येन सुनाभिदेशा ।
वृथा गतं तस्य नरस्य जीवितम् ॥ २२ ॥

सुष्टु लक्षणानि यस्या: सुलक्षणा लक्षणवतीत्यर्थ: । मानः अस्यास्तीति तथा भूता प्रसन्नं सानंदं वक्त्रं मुखं यस्या: स्मितमुखीत्यर्थ: । मृदु कोमलं भाषते बूते इतिमृदुभाषिणी । सुष्टु शोमनः नाभिदेशः नाभिप्रदेशः यस्याः एतादृशी येन पुंसा न चुम्बिता तस्य नरस्य जन्म वृथा गतम् ।

જે સારા લક્ષણુવાળી, ટેક ધરાવનારી, ગુણુવંતી, પ્રસન્ન વદનવાળી, મધુર ભાષણ કરનારી, અને શોભાયમાન નાભી પ્રદેશવાળી તરુણી જેણે, ચુંબીનથી (તેનું જેણે ચુંબન કર્યું નથી) તે પુરૂષનું જીવન વૃથા ગયું.

शुक उवाच ॥

पत्न्यार्जितं सर्वसुखं विनश्वरं ।
दुःखप्रदं कामिनिभोगसेवितम् ॥
एवं विदित्वा न धृतो हि योगो ।
वृथा गतं तस्य नरस्य जीवितम् ॥ २३ ॥

पत्न्या स्त्रिया अर्जितं प्रापितं सर्वंचतत् सुखं विनश्वरं नश्वरं शीलं कामिन्याः भोगोपभोग स्तेनसेवितं तदपि दुःखप्रदं । एवं विदित्वा ज्ञात्वा योगोनधृतस्तस्य जीवितम् वृथागतम् ।

જેણે કામિનિનાં ઉપભોગથી મળેલુ સ્ત્રીએ સંપાદન કરેલુ બધુ સુખ નાશવંત અને દુઃખ આપનારૂં છે, એવું જાણીને યોગ ધારણ કર્યો નથી તેનું જીવતર નકામું ગયું.

रंभोवाच ॥

विशालवेणी नयनाभिरामा ।
कन्दर्पसंपूर्णनिधानरूपा ॥
भुक्ता नयेनैव वसंतकाले ।
वृथा गतं तस्य नरस्य जीवितम् ॥ २४ ॥

विशाला महती वेणी केशकलापो यस्याः । नयनै प्रशस्तनयनैर्नेत्रैरभिरामा मनोज्ञा । कंदर्पः काम स्तस्य संपूर्णं निधानरूपं यस्यः । एतादृशी स्त्रीयेनपुंसा वसंतस्य काममित्रस्य काले समये नभुक्ता नसेविता तस्य नरस्यपुंसो जीवितम् वृथा गतम् ।

જેણે લાંબા કેશ કલાપવાલી નેત્રને આનંદ ઉપજાવનારી સંપૂર્ણ રીતે કામ દેવના ભંડાર રૂપ સ્વરૂપવાળી તરૂણી સ્ત્રી વસંત ઋતુમાં ભોગવી નથી, તેનું જીવન વૃથા ગયું.

शुक उवाच ॥

मायाकरण्डी नरकस्यहण्डी ।
तपोविखण्डी सुकृतस्य भण्डी ॥
नृणां विखंडी चिरसेविता चेत् ।
वृथा गतं तस्य नरस्य जीवितम् ॥ २५ ॥

मायायाः करण्डी । नरकस्य रौरवादिकस्य हण्डी तपसो नियमस्य विखंडी नाशं कुर्वाणा । सुकृतस्य पुण्यस्य भण्डी नाशं-कुर्वाणा नृणां विखण्डी (एतादृशी स्त्री) चिरं चिरकालं सेविताचेत् तस्यपुंसो जीवितम् वृथा गतम् ।

જેણે માયાની પેટીરૂપ નરકના સ્થાનરૂપ તપનો નાશ કરનારી. પુણ્યનો નાશ કરનારી મનુષ્યોનો નાશ કરનારી સ્ત્રી ઘણા વખત સુધી સેવી જો તો તેનું જીવન વૃથા ગયું.

रंभोवाच ॥

समस्तशृंगारविनोदशीला ।
लीलावती कोकिलकण्ठनादा ॥
विलासिता नो नवयौवनाढ्या ।
वृथा गतं तस्य नरस्य जीवितम् ॥ २६ ॥

समस्ताः समग्राः ये शृङ्गारास्तेषु विनोद आनंदएव शीलं यस्याः । लीला स्संति अस्याः सा । कोकिलायाः कंठस्तस्य

नाद इव नादः शब्दो यस्याः सा एतादृशी। नवं चतत् यौवनं तेन आढ्या संपूर्णा यौवनवती युवतीत्यर्थः स्त्री येन पुंसा न विलासिता तस्य जीवितम् वृथा गतम्।

જેણે, બધા શ્રૃંગારવાળી અને મોજ શોખવાળી, અનેક પ્રકારની લીલાવાળી, કોયલના કંઠના જેવા મધુર કંઠવાળી, નવા યોવનથી સંપુર્ણ સ્ત્રીનો વિલાસ કર્યો નથી તેનું જીવન વૃથા ગયું.

शुक उवाच ॥

समाधिहंत्री जनमोहयित्री।
धर्मे कुमंत्री कपटस्य तन्त्री॥
सत्कर्महंत्री कलिता च येन।
वृथा गतं तस्य नरस्य जीवितम्॥ २७॥

समाधे र्नियमस्य हंत्री नाशंकुर्वाणा जनान्मोहयतीति जनसंमोहकारिणि धर्मे कुमंत्री कुत्सितोपदेशकारिणी कपटस्य प्रपञ्चस्य तन्त्री सत्कर्माणि हनन्ति इति तथा भूता येन नकलिता न सेविता तस्य जन्म वृथा गतम्।

જેણે સમાધિને નાશ કરનારી માણુસોને મોહ ઉપજાવનારી ધર્મમાં મોટા ઉપદેશ આપનારી કપટની તંત્રીરૂપ સત્કર્મનો નાશ કરનારી યુવતી સ્ત્રી સેવિ છે તેનું જીવન વ્યર્થ ગયું.

रंभोवाच ॥

विल्वस्तनी कोमलिता सुशीला ।
सुगन्धकुन्ता ललिता च गौरी ।
नोश्लेषिता येन च कण्ठदेशे ।
वृथा गतं तस्य नरस्य जीवितम् ॥ २८ ॥

बिल्वे इव बिल्व फले इव स्तनौ कुचौ यस्याः सा पुष्टस्तनीत्यर्थं । कोमलिता सुकोमला । सुष्टु शीलं स्वभावो यस्याः सुस्वभावेत्यर्थः । सुगन्धकुन्ता सुष्टु शोभनाः गंधाः सुगंधाः कुन्ताः केशा यस्याः सुगन्धकेशवतीत्यर्थः ललिता सुन्दरी गौरी गौरवर्णा स्त्री कण्ठदेशे येन पुंसा नाश्लेषिता तस्य नरस्य जीवितं वृथा गतम् ।

બીલાં જેવા સ્તનવાળી સુકુમાર શરીરવાળી સારા સ્વભાવવાળી સુંદર કેશવાળી શોભાયમાન અને ગૌર વર્ણવાળી તરૂણી જે પુરૂષે ગળેવળગાડી નથી તેનું જીવન વૃથા ગયું સમજવું.

शुक उवाच ॥

चिन्ताव्यथा दुःखमयी सदोषा ।
संसारपाशा जनमोहकर्त्री ॥
संतापकोशा भाजिता च येन ।
वृथा गतं तस्य नरस्य जीवितम् ॥ २९ ॥

चिंता व्यथा दुःख प्रचुरा तन्मयीत्यर्थः । दोषैः सह वर्तते इति सदोषा । संसारे पाशारूपा । जनमोहकर्त्री मोहं करोतीति मोहकर्त्री, जनानाम् मोहकर्त्री तथाभूता । संतापे कोशरूपा संताप भूयिष्टेत्यर्थः । एतादृशी येन पुंसा न भजिता सेविता तस्य जीवितम् वृथा गतम् ।

જેણે ચિંતા મનોવ્યથા. અને દુઃખથી સંપૂર્ણ દુઃખવાળી. (જેને સેવવાથી દુઃખ ચિંતા તથા મનોવ્યથા થાય છે એવી) અનેક પ્રકારના દોષવાળી, સંસારમાં પાશરૂપ, મનુષ્ય માત્રને મોહ ઉપજાવનારી, સંતાપના ખજાનારૂપ સ્ત્રી સેવી છે. તેનું જીવન વ્યર્થ ગયું.

रंभोवाच ॥

आनंदकन्दर्पनिधानरूपा ।
रणत्क्वणत्कंकणनूपुराढ्या ॥
नास्वादिता येन सुधाधरस्था ।
वृथा गतं तस्य नरस्य यौवनम् ॥ ३० ॥

आनन्दयुक्तः कन्दर्पः आनंदकन्दर्पः स्तस्य निधानरूपा । रणंति क्वणंति शब्दायमानानि कंकणानि च नूपुराणि तैराढ्या शोभिता । अधरे तिष्ठति इति अधरस्था सुधा अधरस्था यस्याः तथाभूता स्त्री येन पुंसा न आस्वादिता तस्य जीवितम् वृथा निरर्थकं गतम् ।

જેણે આનંદ અને મદનના ભંડાર રૂપવાળી. શબ્દાયમાન કંકણ અને ઝણુકારવાળા નૂપુરથી શોભતી અને સુધા (અમૃત) જેના અધરોષ્ઠમાં રહેલી છે એવી લાવણ્યવાળી સ્ત્રી ભોગવી નથી તેનું જીવન વૃથા ગયું.

शुक उवाच ॥

कापटय वेषा जनवञ्चिका सा ।
विण्मूत्रदुर्गन्धदरी दुराशा ॥
संसेविता येन सदामलाढया ।
वृथा गतं तस्य नरस्य जीवितम् ॥ ११ ॥

कपटस्यायं कापटयः वेषो यस्याः कपटयुक्तवेषोयमर्थः जनान् वञ्चयति तथाभूता सा विण्मूत्रदुर्गन्धानांदरीव दुष्टा आशा यस्याः। मलेन आढया संपूर्णा एतादशी स्त्री येन पुंसा सदा संसेविता तस्य जीवितम् वृथा गतम्

જેણે કપટ યુક્ત વેષવાળી માણસોને ફસાવનારી વિષ્ટા મૂત્ર વિગેરે અનેક દુર્ગન્ધિથી ભરેલી ગુહારૂપ દુષ્ટઆશાવાળી મેલથી ભરેલી સ્ત્રી હંમેશાં સેવી છે તેનું જીવન વૃથા ગયું.

रंभोवाच ॥

चंद्रानना सुन्दरगौरवर्णा ।
व्यक्त ..ना भोगविलासदक्षा ॥

नान्दोलिता वै शयने येन ।

वृथा गतं तस्य नरस्य जीवितम् ॥ ३२ ॥

चंद्र इव इन्दुरिवाननं मुखं यस्याः चन्द्रमुखीत्यर्थः । सुंदरः। गौरः वर्णो यस्याः । व्यक्तौ स्पष्टं दृश्यमानौ स्तनौ कुचौ यस्याः । भोगस्य विलासे दक्षा निपुणा । एतादृशी स्त्री येन पुंसा शयनेषु न आन्दोलिता न आलिंगिता । तस्य पुंसः जीवितम् वृथा गतम् ।

જેણે ચંદ્ર જેવા મુખવાળી સુંદર ગૌરવર્ણવાળી, દેખાવડા સ્તનવાળી ભોગ વિલાસમાં ચતુર સ્ત્રી, શયનમાં આલીંગી નથી તેનું જન્મ જીવિત નકામું ગયું.

शुक उवाच ॥

उन्मत्तवेषा मदिरासु मत्ता ।

पापप्रदा लोकविडंबिनीया ॥

योगच्छला येन विभाजिता च ।

वृथा गतं तस्य नरस्य जीवितम् ॥ ३३ ॥

उन्मत्तो वेशो यस्याः। मदिरासु मद्येषु मत्ता मन्दोन्मत्ता । पापं प्रददाति इति पापप्रदा । लोकान् विडंबयति इति तथा भूता । योगच्छला योगमार्गे कपटरूपा । या स्त्री, येन पुंसा विभाजिता सेविता तस्य जीवितम् वृथा गतम् ।

જેણે ઉન્મત્ત વેષવાળી મદિરા પીવાથી મદોન્મત્ત બનેલી, પાપી

બનાવનારી, લોકોને ઠગનારી, સ્ત્રીનું સેવન કર્યું છે તેનું જીવન વ્યર્થ ગયું.

रंभोवाच ॥

आनंदरूपा तरूणी नताङ्गी ।
सद्धर्मसंसाधनसृष्टिरूपा
कामार्थदा यस्य गृहे न नारी ।
वृथा गतं तस्य नरस्य जीवितम् ॥ १४ ॥

आनंदेन युक्त रूपं यस्याः । तरूणी युवती । नतं अङ्गं यस्याः । सन् चासौ धर्मश्चतस्यसम्यक् साधनं तस्य सृष्टि रूपा । कामं अर्थं च ददाति इति तथाभूता । नारी स्त्री। यस्य गृहे नास्ति तस्य नरस्य जीवितं वृथा गयम् ।

જેના ઘરમાં આનંદને ઉપજાવનાર સ્વરૂપવાળી, લચકતા અંગોવાળી સારા ધર્મમાં સાધનોની સૃષ્ટીરૂપ, કામને તથા અર્થને આપનારી સ્ત્રી નથી તેનું જીવન વૃથા ગયું.

शुक उवाच ॥

अशौचदेहा पतितस्वभावा ।
वपुःप्रगल्भा चललोभशीला ॥
मृषा वदन्ती कलिता च येन ।
वृथा गतं तस्य नरस्य जीवितम् ॥१५॥

अशौच: अपवित्र: देह: शरीरं यस्या: अपवित्रशरीरेत्यर्थ: पतित: नीच: स्वभावो यस्या: धृष्टा प्रगल्भा निर्भीका । बलस्य परबलस्य लोभ: एव शीलं यस्या: परबल हरणशीलेत्यर्थ: । मृषा अनृतं वदतीति वदन्ती मिथ्याभाषिणीत्यर्थ: एतादृशी स्त्री येन पुंसा सेविता व्याख्या तस्य पुंस: जीवितम् व्यर्थं गतम् ।

જેણે અપવિત્ર દેહવાળી નીચ સ્વભાવવાળી શરીરનો દમામ રાખ-નારી પુરૂષના બલને હરણ કરનારી જુઠું બોલનારી સ્ત્રી સેવી છે તેનું જીવન વ્યર્થ ગયું.

रंभो उवाच ॥

क्षामोदरी हंसगतिः प्रमत्ता ।
सौन्दर्यसौभाग्यवती प्रलोला ॥
निष्पीडिता येन रतौ यथेच्छं ।
वृथा गतं तस्य नरस्य जीवितम् ॥२६॥

क्षामं कृशं उदरं मध्यं यस्या: । कृशोदरीत्यर्थ: । हंस इव मराल इव गतिः गमनं यस्या: । प्रमत्ता उन्मत्ता । सुन्दरस्यभावं सुभगाया: भाव: सौभाग्यं च तद्वती । प्रलोला चंचला येन पुंसा रतो क्रिडायाम् यथेच्छं संपूर्णतया न निपीडिता चेन्न मर्दिता चेत्त-स्य जीवितं वृथा गतम्

જેણે પાતળી કમરવાળી, હંસ જેવી ચાલવાળી, ઉન્મત્ત બનેલી છટાદાર દેખાવવાળી, ઘણીજ ચંચળ સ્ત્રી, કામક્રીડામાં ઇચ્છા પૂરી થાય ત્યાંસુધી નથી રગદોળી તેનું જીવન વ્યર્થ ગયું.

शुक उवाच ॥

संसारसद्भावनभक्तिहीना।
चित्तस्य चोरा हृदि निर्दया च ॥
विहाय योगं कलिता नरेण।
वृथा गतं तस्य नरस्य जीवितम् ॥ ३७

संसारे सद्भावना यस्यतया भक्त्या हीना रहिता। चित्तस्यान्तःकरणस्य चोरा हरणशीला। हृदि हृदये निर्दया दयारहिता। एतादृशी स्त्री येन पुंसा योगं विहाय योगमार्गं त्यक्त्वा कलिता आलिङ्गिता तस्य जीवितं वृथा गतम्

જેણે સંસારમાં સત્ય સ્વરૂપવાળા ભગવાનની ભક્તિ વિનાની, ચિત્તને ચોરનારી, નિર્દય હૃદયવાળી, સ્ત્રી, સેવી છે. તેનું જીવન વૃથા ગયું.

रंभोवाच

सुगन्धैः सुपुष्पैः सुशैया सुकान्ता।
वसन्तो ऋतुः पूर्णिमापूर्णचन्द्रः ॥

यदा नास्ति पुंस्त्वं नरस्य प्रभूतम् ।
ततः किं ततः किं ततः किं ततः किम् ॥ ३८

सुष्टु गन्धः येषां तानि सुगन्धवति तै। स्सुपुष्पे स्सुकुसुमै रलंकृता सुशैया पर्यंकः च सुकान्ता युवती। वसन्तः मधु ऋतु । पूर्णिमायाः पूर्णश्चासौ चन्द्रः। सर्वाणि वस्तूनि सन्ति किं तु यदा नरस्य पुंसः भाव पुस्त्वं पुरुषत्वं प्रभूतं अत्यन्तं नास्ति चेत्तदा ततः शय्यायाः किं प्रयोजनं सुकान्तायाः किं वसंतेन किं। पूर्णिमापूर्णचन्द्रेण किम् ।

જો પુરૂષનું વિશેષ પુરૂષાતન નથી તો સારી સુગંધીવાળાં પુષ્પો-થી શું? શોભાવાળી શૈયાથી શું? સારી સ્ત્રીથી શું? વસંત રૂતુ હોય તો પણ શું? પુર્ણિમાનો સંપૂર્ણ ખીલેલો ચંદ્રહોય તો પણ શું? કંઇજ નહિ.

शुक उवाच ॥

सुरूपं शरीरं नवीनं कलत्रम् ।
धनं मेरुतुल्यं वचश्चारुचित्रम् ॥
हरेरंघ्रि युग्मे मन श्चेदलग्नम् ।
ततः किं ततः किं ततः किं ततः किम् ॥३९॥

सुष्टु रूपं यस्य तत्सुरूपं शरीरं । नवीनं नूतनं कलत्रं युवती स्त्री मेरुणा तुल्यं धनं द्रव्यं चारु सुंदरं प्रियं चित्रमलङ्कारयुक्तं वचः वाक्यं उपरि सर्ववर्णितमस्ति किंतु हरेः ईश्वरस्यांघ्रि युग्मे चरणकम-

लयुग्मे मनः अन्तःकरणं नलग्नं चेत्तेन सुरूपशरीरादिना किं न किमपीत्यर्थःअतो मोहं विहाय सच्चिदानंदो ध्येतव्य इत्यर्थः ।

ભગવાનના ચરણ કમળમાં જો મન લાગ્યું નથી તો સારા રૂપવાળું શરીર હોય તેનાથી શું. નવીયૌવનવાળી સ્ત્રી હોય તો તે તેનાથી શું મેરૂ પર્વત જેટલું અથાગ દ્રવ્ય હોય તો તે દ્રવ્યથી શું. અને રમણીય છટાદાર વાણી હોય તો તેથી શું કંઈજ નહિ.

उपसंहार.

કર્યો શ્રમ રંભાએ, તદપિ મોહ્યા મુનિ નહીં;
કદી વાયુથીએ, ગિરિવર કંપ્યો છે કહીં;
રહી ગાતી ગાતી, નયન મુખ નાચ્યું કરી;
અહો શુકની વૃત્તિ, સહુ સજ્જન દ્રઢ બની.

समाप्त

આ પુસ્તક પ્રજા સમક્ષ મુકવામાં પાદરા જીલ્લે વડોદરાના નીચેના ગૃહસ્થોએ મદદ કરી છે.

૧૦-૦-૦ સ્વ. શા. જેઠાભાઇ ધરમચંદના આત્માની શાંતિને અર્થે હા. શા. માણેકલાલ જેઠાભાઇ.

૧૦-૦-૦ સ્વ. શા. ચુનીલાલ પીતાંબરદાસ „ „ હા. શા. છોટાલાલ પીતાંબરદાસ.

૭-૦-૦ સ્વ. શા. બાપુલાલ પીતાંબરદાસ „ „ હા. શા. ડાહ્યાલાલ બાપુલાલ.

૫-૦-૦ શા. છોટાલાલ પીતાંબરદાસ પરોપકારાર્થે હા. પોતે.

૩-૦-૦ શા. ભાઇલાલ નાથાભાઇ (વૃજલાલના) પોતાનાં ધર્મ પત્ની સ્વ. સૌ. ચંચળ ઉર્ફે પરસનના આત્માની શાંત્યર્થે.

૩-૦-૦ સ્વ. શા. સામળદાસ ગિરધરદાસના આત્માની શાંત્યર્થે હા. લલ્લુભાઇ શામળદાસ.

૨-૦-૦ સ્વ. ગોરધનદાસ હરિલાલના આત્માની શાંત્યર્થે હા. પુંજાલાલ હરિલાલ રે. મજુસર તા. સાવલી.

૧-૦-૦ પંડયા. મગનલાલ દયારામ પરોપકારાર્થે હા. પોતે

ઉપર મુજબ મદદ આપી આ પુસ્તકને જન સમાજમાં લાવવાનું ઉત્તમ કાર્ય કરવા માટે એ ગૃહસ્થોને ધન્યવાદ ઘટે છે.